National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 294-297
© 2026 NJHSR
www.sanskritarticle.com

मुकेशकुमारमिश्रः
शोधच्छात्रः, साहित्यविभागः,
श्रीलालबहादुरशास्त्रिराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नव देहली

Correspondence:
मुकेशकुमारमिश्रः
शोधच्छात्रः, साहित्यविभागः,
श्रीलालबहादुरशास्त्रिराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नव देहली

श्रीरामभद्राचार्यविरचितं गीतरामायणमहाकाव्यम् – एकः परिचयः (भाग - क)

मुकेशकुमारमिश्रः

संस्कृतवाङ्मये आदिकविमहर्षिवाल्मीकेरारभ्य अद्यावधिपर्यन्तं महाकाव्यकाराणामेका विशालपरम्परा विद्यते। येषु महर्षिवाल्मीकिः महर्षिवेदव्यासश्च आर्षकविरिति मन्येते तथा च क्रमशः तयोः रचनाद्वयं 'रामायणम्' 'महाभारतञ्च' 'आर्ष-काव्यम्' इति सञ्ज्ञया अभिहितं भवति। एतौ द्वौ ग्रन्थरत्नौ परवर्तिनां प्रायः सर्वेषां रचनाकाराणां कृते कस्मिन्नपि रूपे उपजीव्यौ बभूवतुः। एतेषु वर्णितं कथावस्तु, काव्यविधानम्, रचनाशैली, वर्णनात्मकता इत्यादयः आधारभूताः भूत्वा उत्तरवर्तिनां रचनाकाराणां कृते दृश्यश्रव्यकाव्ययोः अन्तर्गतमनेकानां नाट्यकाव्यग्रन्थानां रचनायै प्रेरणाप्रदौ अभूताम्। वर्तमानयुगेऽपि काव्यस्य अनेकेषु विधासु याः रचनाः विरचिताः तासां मूले कथमपि रामायणमहाभारतयोः तत्त्वानि विद्यमानानि सन्ति।

चित्रकूटस्थतुलसीपीठस्य जगद्गुरु-रामानन्दाचार्य-प्रज्ञाचक्षु-धर्मचक्रवर्ति-महामहोपाध्याय-स्वामी-श्रीरामभद्राचार्य-महाराजैः विरचितं 'गीतरामायणम्' (गीतसीताभिरामम्) महाकाव्यं संस्कृतवाङ्मयस्य महाकाव्यपरम्परायामेकम् अनन्यमद्भुतञ्च महाकाव्यं वर्तते। मर्यादापुरुषोत्तमस्य भगवतः श्रीरामचन्द्रस्य जीवनचरित्रं गीतशैल्या विरच्य 'गीतरामायणम्' इति नाम्ना यत् महाकाव्यस्वरूपं दत्तम्, तेन न केवलं संस्कृतवाङ्मयः समृद्धोऽभवत्, अपितु गीतशैल्याः महाकाव्यस्य अभावस्यापि पूर्तिः जाता। यद्यपि संस्कृतवाङ्मये विभिन्नशैल्या रचिताः अनेके महाकाव्यग्रन्थाः प्राचीनयुगादेव दृष्टिपथमायान्ति, परन्तु गीतशैल्या अद्यापि न कोऽपि महाकाव्यग्रन्थः संस्कृतवाङ्मये उपलब्ध आसीत्। ईदृश्यां परिस्थितौ स्वकीयेन एतेन लोकोत्तरमहाकाव्यग्रन्थेन जगद्गुरवः तमभावं पूरितवन्तः। एतदर्थं वयं सर्वे जगद्गुरुवर्याणां कृतज्ञाः भवितव्याः, येषां जिह्वाग्रे नर्तमाना भारती वाग्देवी तेषां विलक्षणमेधां ईदृशानां ग्रन्थरत्नानां प्रणयनाय प्रेरयन्ती तिष्ठति। सम्प्रति जगद्गुरु-स्वामि-श्रीरामभद्राचार्य-प्रणीत-गीतरामायणमहाकाव्यस्य परिचयः प्रस्तुतः—

स्वरूपम्

स्वरूपदृष्ट्या विचार्यमाणे ज्ञायते यत्, आदिकवेः महर्षिवाल्मीकेः रामायणमेवानुसृत्य महाकविश्रीराम-भद्राचार्यवर्याः स्वकीयस्य गीतरामायणमहाकाव्यस्य निर्माणं काण्डेषु तदन्तर्गतं सर्गेषु कृतवन्तः। वाल्मीकीयरामायणवत् अत्रापि सप्त काण्डानि सन्ति - १. बालकाण्डम्, २. अयोध्याकाण्डम्, ३. अरण्यकाण्डम्, ४. किष्किन्धाकाण्डम्, ५. सुन्दरकाण्डम्, ६. युद्धकाण्डम्, ७. उत्तरकाण्डञ्चेति। तेषु बालकाण्डे एकादश सर्गाः, अयोध्याकाण्डे नव सर्गाः, अरण्यकाण्डे एकः सर्गः, किष्किन्धाकाण्डे एकः सर्गः, सुन्दरकाण्डे द्वौ सर्गौ, युद्धकाण्डे द्वौ सर्गौ, उत्तरकाण्डे च द्वौ सर्गौ सन्ति। एवं प्रकारेण गीतरामायणमहाकाव्ये आहत्य अष्टाविंशतिः (२८) सर्गाः वर्तन्ते। सर्वाधिकसर्गात्मकं काण्डं बालकाण्डमस्ति, यत्र एकादश सर्गाः विद्यन्ते। ततः परम् अयोध्याकाण्डम्, यत्र नव सर्गाः सन्ति।

तदनन्तरं सुन्दरकाण्डं, युद्धकाण्डम्, उत्तरकाण्डञ्च, येषु प्रत्येकस्मिन् द्वौ सर्गौ वर्तेते। अन्ते अरण्यकाण्डं किष्किन्धाकाण्डञ्च स्तः, येषु प्रत्येकस्मिन् एकः सर्गः वर्तते।

गीतानां सङ्ख्यादृष्ट्या विलोकयन् ज्ञायते यत्, पूज्यमहाराजवर्याः गीतरामायणमहाकाव्यस्य प्रत्येकस्मिन् सर्गे षट्त्रिंशत् (३६) गीतानि अनुस्यूतानि कृतवन्तः। एवं प्रकारेण सप्त-काण्डानां सर्गाः मिलित्वा अष्टाविंशतिः (२८) भवन्ति। येषु प्रत्येकसर्गे षट्त्रिंशत् (३६) गीतानि सन्ति। आहत्य योजनेन 28 × 36 = 1008 अष्टोत्तरसहस्रम् गीतानि महाकाव्येऽस्मिन् वर्तन्ते। महाकाव्यस्य कथावस्तुनः तारतम्यं यथावत् भवेत्, तत्र विच्छेदो न स्यात्, एतदर्थं महाकविना आवश्यकतानुसारं गीतान्तरालेषु विभिन्नैः संस्कृतच्छन्दोभिः सह गद्यपद्यानामपि रचना कृतास्ति।

गीतरामायणस्यारम्भो जगद्गुरुभिः स्रग्धराछन्दसि आशीर्वादात्मक-मङ्गलाचरणेन कृतम्। तद्यथा -

"श्रीसीताहृत्सरोजे कृतनिजनिलयो नीलरत्नावदातो
रातः श्रीप्रेमराया रघुकुलमहिषीमान्यया मञ्जुगुञ्जः।
ऐश्वर्याद्यैः षडङ्घ्रिर्भजनजनिरसं रातु रामानुगेभ्यो
भौमीभव्यास्यकञ्जासवमभिरसयन् रामराजालिलिराजः॥"[१]

अर्थात् यः श्रीसीतादेव्याः हृदयकमले स्वकीयं निवासस्थानं कृतवान्, यो नीलमणिसदृशः सुन्दरः, यः श्रीरामप्रेम्णः एकमात्रं धनम्, रघुवंशस्य राश्यां माननीया कौशल्यादेवी यं प्रभूय संसारं समर्पितवती, यस्य गुञ्जनम् अर्थात् शब्दः अतीव मधुरो, यः ऐश्वर्य-धर्म-यशः-श्री-ज्ञान-वैराग्य-रूपैः षड्भिश्चरणैः युक्तः, भूमिनन्दिन्याः सीतादेव्याः मुखकमलस्य सौन्दर्यमकरन्दस्य पानं कुर्वन् भ्रमरश्रेष्ठः राजाधिराजः भगवान् श्रीरामः, श्रीरामानुगामिभ्यः श्रीरामभक्त-वैष्णवेभ्यः भजनोत्पन्नरसं प्रयच्छतु।

आचार्यवर्यैः महाकाव्यस्य सर्वेषां सर्गाणामारम्भो मङ्गलाचरणेन कृतः। वस्तुतः तेषामखिलमेव गीतरामायणमहाकाव्यम् प्रेमभक्तिरूप-तत्त्वेन युक्तं वर्तते। एतस्मात् कारणात् सम्पूर्णं महाकाव्यमेवास्ति मङ्गलाचरणात्मकं ग्रन्थरत्नम्। महाकाव्यस्यास्य अध्ययनं श्रवणं वा कुर्वत एव पाठकस्य श्रोतुर्वा अन्तःकरणं प्रभुश्रीरामस्य चरणेषु भक्तिभावेन परिपूर्णं भवति। महाकाव्ये लौकिकगीतेषु ये विविधानि स्तुत्यात्मकानि गीतानि विरचितानि , ते सङ्गीतात्मकतया ललितमनोहरपदावल्या भक्तिरसेन च परिपूर्णानि वर्तन्ते।

पूज्यमहाराजवर्याः स्वयं अस्य महाकाव्यस्य हिन्दीटीकामपि कृतवन्तः। येन संस्कृतभाषानभिज्ञाः हिन्दीभाषिणो जना अपि महाकाव्यस्यास्य रुचिपूर्वकमध्ययनं श्रवणं च कर्तुं शक्नुयुः। तथा च तेभ्यो महाकाव्यस्य कथावस्तुनो भगवतः श्रीरामचन्द्रस्य लोककल्याणकारिजीवनचरित्रस्य चावगमने काठिन्यं न स्यात्। अस्याः हिन्दीटीकायाः नाम तैः 'भौमी' इति कृतम्। ग्रन्थारम्भे मङ्गलाचरणानन्तरं ते रघुकुलनन्दनश्रीरामस्य जयकारं कुर्वन्तः लिखितवन्तः -

"जय जय श्रीसीताभिराम श्रीराम राम रघुकुलनन्दन।
निखिललोकनयनाभिराम घनश्याम कामरिपुचन्दन॥
सुकृतगीतसीताभिराम सुरगिरागीतरामायण की।
भौमीव्याख्या राष्ट्रगिरा में करता शुभ पारायण की॥"[२]

अस्याग्रे आचार्याः लिखन्ति यत् - "अधुनाहम् स्वयमेव विरचितस्य संस्कृतगीतकाव्यस्य गीतरामायणस्य (गीतसीताभिरामस्य) राष्ट्रभाषा-हिन्दीभाषायां भावार्थरूपेण 'भौमी' इति नामिकां व्याख्यां प्रस्तौमि, येन संस्कृतभाषायाम् अनभिज्ञाः महानुभावाः अपि गीतरामायणं सरलतया अवगम्य गानं कर्तुं शक्नुयुः।"[३]

<u>कथावस्तु</u>

गीतरामायणमहाकाव्यस्य कथावस्तुनः चयनं महाकवि-स्वामि-श्रीरामभद्राचार्यवर्याः मुख्यतया महर्षिवाल्मीकेः आदिकाव्य-रामायणात् कृतवन्तः। रामायणं व्यतिरिच्य, भगवतः श्रीरामचन्द्रस्य लोककल्याणकारिणामादर्शचरितानां वर्णनं कुर्वतां धार्मिकग्रन्थानां यथा - गोस्वामितुलसीदासविरचितं 'श्रीरामचरितमानसं', 'कवितावली', 'गीतावली' इत्यादीनां भक्तिभावपूर्णकथावस्त्वपि आधृत्य स्वीकृतवन्तः। श्रीरामचरितसम्बद्धाः पूर्ववर्तिनः येऽपि ग्रन्थाः सन्ति, ते संस्कृतभाषायां वा हिन्दीभाषायां वा अन्यप्रादेशिकभाषासु वा रचिताः स्युः, तेषामपि अनुशीलनं कृत्वा स्वकीयया नैसर्गिक-प्रतिभा-कल्पनाशक्त्या तस्मिन् कथावस्तुनि नवीनतां, कौतूहलतां, मौलिकतां, रोचकतां चाधाय स्वामिश्रीरामभद्राचार्यवर्याः गीतरामायणमहाकाव्यस्य प्रणयनं कृतवन्तः। तथा च तं प्रेमभक्तिरसेन परिपूर्य लोकोत्तरचमत्कारकारिकं कृतवन्तः। श्रीतुलसीदासविरचितं श्रीरामचरितमानसं न केवलं सनातनधर्मावलम्बिनां हिन्दुजना-नामतीवसमादरणीयो धर्मग्रन्थो वर्तते, अपितु समस्तधर्माव-लम्बिनामपि आदरास्पदं भजते। न केवलं भारते अपितु विश्वस्य नैकेषु देशेष्वपि ग्रन्थोऽयं महनीयं स्थानं प्राप्तवान्। स्वकीयात् रचनाकालादारभ्य अद्यावधिपर्यन्तमस्य ग्रन्थस्य प्रतिष्ठा अक्षुण्णरूपेण विद्यते। अस्मिन् वर्णितानि तथ्यानि पूर्णतया प्रामाणिकत्वेन विद्वांसः स्वीकुर्वन्ति। अवधीभाषायां रचितोऽयं ग्रन्थो मर्यादापुरुषोत्तमश्रीरामस्याद्भुतं लोकोत्तरञ्च जीवनचरितम् आदर्श-रूपेण चित्रयति। श्रीरामं पूर्णपरब्रह्म मत्वा बहुषु स्थलेषु गोस्वामिवर्याः तस्यानन्तरूपगुणगाथायाः विषये लिखितवन्तः। यथा-

१. "नाना भाँति राम अवतारा। रामायन सत कोटि अपारा॥
कलपभेद हरिचरित सुहाए। भाँति अनेक मुनीसन्ह गाए॥
करिअ न संशय अस उर आनी। सुनिअ कथा सादर रति मानी॥
दोहा- राम अनन्त अनन्त गुन, अमित कथा विस्तार।
सुनि आचरजु न मानिहहिं, जिन्ह के विमल विचार॥"[४]

२. "जथा अनन्त राम भगवाना। तथा कथा कीरति गुन नाना॥"[५]

३. "रामचरित सत कोटि अपारा। श्रुति सारदा न बरनै पारा॥
राम अनन्त अनन्त गुनानी। जन्म कर्म अनन्त नामानी॥"[६]

चित्रकूटस्थतुलसीपीठस्य 'जगद्गुरुरामानन्दाचार्य' इतिपदे प्रतिष्ठितः श्रीरामभद्राचार्यमहाराजः अलौकिकपाण्डित्यप्रतिभासम्पन्नः,अनेकेषां शास्त्रीयग्रन्थानां विज्ञाता, तेषां प्रणेता आचार्यस्तथा च तुलसी-

साहित्यस्य संरक्षकः सिद्धान्तानां पोषकः सन्तश्च वर्तते। स स्वकीयाराध्यं श्रीरामचन्द्रं पूर्ण-परात्पर-परब्रह्म मत्वा साकेतविहारिश्रीरामरूपेण वर्णितवान्। तथ्यमिदं जगद्गुरुणा गीतरामायणमहाकाव्यस्य बालकाण्डस्य द्वितीयसर्गे तृतीये गीते 'भौमीव्याख्यां' लिखन् स्पष्टीकृतम्[७]। पुराणेषु वर्णितान् भगवद्विष्णोर्दशावतारानपि स बालकाण्डस्य प्रथम-सर्गस्य चतुर्थे गीते श्रीरामस्य दशावतारान् मत्वा भक्तिभावेन तेषां जयकारं कृतवान्[८]। तथा च निखिले महाकाव्ये तेन श्रीरामचरितमेव प्रेमभक्त्या गीतशैल्या गीतम्। गीतरामायणमहाकाव्यस्यारम्भे मङ्गला-चरणात्मके चतुर्थ-पद्ये स महाकाव्यस्यास्य कथावस्तुनः विषये उल्लिखितवान् यत् - "इदं कथावस्तु श्रीसीतारामप्रसिद्धचरितैः निःस्यूतं प्रेमामृतयुक्तम् विद्यते, तथा च श्रीसीताप्रीतिरेव महाकाव्यस्यास्य प्रयोजनम् वर्तते" —

"सीतारामप्रथितचरितप्रेमपीयूषभाग्भिः,
सर्गैर्लोकाधिपनयनकैर्भोगदृग्व्योमचैत्यैः।
सीताप्रीत्यै विरचयति रामायणं रामभद्राऽऽ-
चार्यो दैव्यां गिरि गिरिधरो गीतसीताभिरामम्॥"[९]

वर्णनविन्यासः –

राघवेन्द्रसरकारस्य श्रीसीतारामस्याद्भुतलीलाभिः युक्तो लोक-कल्याणकारिचरित्रात्मकस्य गीतरामायणमहाकाव्यस्य कथावस्तुनो वर्णनविन्यासोऽत्यन्तं वैज्ञानिकः, सहजः, स्वाभाविकश्च वर्तते। सङ्गीतात्मकलयबद्धतया ललिताभिः सुमनोहरपदावलीभिः जगद्गुरुवर्याः महाकाव्यस्य कथावस्तुनः वर्णनं कृतवन्तः। आद्यन्तं सकलकथा रोचिका प्रभावोत्पादिका च वर्तते। उदाहरणार्थं गीतरामायणस्य बालकाण्डस्य द्वितीयसर्गस्य, यस्य नाम 'गीतराघवाविर्भाव' इति अस्ति, तस्य द्वितीयं गीतं द्रष्टव्यम्, यत्र पौलस्त्यरावणस्य दुष्कृत्यैः पीडिताः, अतिभयभीताः देवाः, हरिहराभ्यां सह प्रणतभयहारिणं जगदीश्वरं श्रीरामचन्द्रं अवतारहेतोः प्रार्थयन्ति -

"जगदीश जगदुद्धर प्रभो! अवतर प्रभो! अवतर प्रभो!
जगते मनुजमुपहर प्रभो! अवतर प्रभो! अवतर प्रभो॥
रोदित्यनाथा गौरियं सीदति विनाथा धौरियम्।
गवि दिवि शुभानि वितर प्रभो! अवतर प्रभो! अवतर प्रभो॥ १॥
क्रन्दते धर्मो भीभरो नन्दत्यधर्मो विज्वरः।
साध्वसं सम्प्रति हर प्रभो! अवतर प्रभो! अवतर प्रभो॥ २॥
श्रुतिसेतुरेवोच्छिद्यते सज्जनसमाजः खिद्यते।
निजभारतं परिचर प्रभो! अवतर प्रभो! अवतर प्रभो॥ ३॥
आतङ्कवादमहाग्रहो रावयति राष्ट्रमसद्ग्रहो।
जनरावणं संहर प्रभो! अवतर प्रभो! अवतर प्रभो॥ ४॥
आयाहि अयोध्यां राम हे! पालय निजान् सुखधाम हे!
गिरिधरदुरितमपहर प्रभो! अवतर प्रभो! अवतर प्रभो॥ ५॥"[१०]

देवतानां तं आर्त्तनादं भावपूर्णप्रार्थनां च श्रुत्वा साकेतविहारी श्रीरामः तान् अवतार-हेतोः आश्वसिति। यथा—

"भारतेऽयोध्यायां मया दशरथगृहेऽवतरिष्यते,
श्रीरामलक्ष्मणभरतशत्रुघ्नाख्ययानुचरिष्यते॥
देवता! मा भैषीष्ट भो! धैर्यं मा शयिषीष्ट भो!
शीघ्रं मया युष्मत्कृते नरवेष एष धरिष्यते॥ १॥
अंशैस्त्रिभिर्हरिभिर्मया ननु सीतया सुविनीतया,
सुफलय्य कौशल्यामनोरथवल्लरीं विचरिष्यते॥ २॥
विसखण्डभञ्जं वृषपतेश्चापं विभज्य च जानकीम्,
स्वीकृत्य वनवासच्छलाद् भूतलभरोऽपहरिष्यते॥ ३॥
युधि रावणं हत्वा मया जगदपभयं कृत्वा मया,
निजभक्तिमङ्गलसम्पदा ननु गिरिधरे वितरिष्यते॥ ४॥"[११]

एवमेव सुन्दरकाण्डस्य द्वितीयसर्गे स्वामीश्रीरामभद्राचार्यमहाराजाः मङ्गलाचरणानन्तरं कथावस्तु वर्णयन्ति यत् वानरश्रेष्ठश्रीहनुमतः सीतादेव्याः समाचारं प्राप्य भगवान् श्रीरामचन्द्रः शत्रुरावणस्य राजधानीं लङ्कानगरीम् प्रति वानरसेनां प्रस्थापितवान्। सा वानरसेना युद्धार्थं कथं प्रस्थानं कुर्वती वर्तते? तं दृश्यं 'रामजी की सेना चली' इति गीतमाधृत्य वर्णितम्। यस्य पठनेन इत्थं प्रतीयते यथा महाकवेः नेत्रयोः पुरत एव निखिलवानरसेना युद्धार्थं प्रस्थानं कुर्वती वर्तते—

"रामस्य सेना प्रस्थिता राघवस्य सेना प्रस्थिता॥

पापमेव पापिनां तापमेव तापिनां हन्तुमेव साध्वसं रक्षसां प्रतापिनाम्।

वानरेन्द्रसेना प्रस्थिता रामस्य सेना प्रस्थिता॥ १॥

गर्जतां प्रतर्जतां भुवो भरं भर्जतां मत्सरं विसर्जतां साहसं च सर्जताम्,
वानराणां सेना प्रस्थिता रामस्य सेना प्रस्थिता॥ २॥
वृक्षशैलशालिनां महावीर्यशालिनां रामकृपाशालिनां रणत्रपाशा-लिनाम्।
बलिनाञ्च सेना प्रस्थिता रामस्य सेना प्रस्थिता॥ ३॥
हनूमतो हङ्कृतैर्जयश्रीणां हिङ्कृतैः मर्कटानां हुङ्कृतैः फणिनाञ्च फुङ्कृतैः।
तरस्विनां सेना प्रस्थिता रामस्य सेना प्रस्थिता॥ ४॥"[१२]

नायकः

गीतरामायणमहाकाव्यस्य कथावस्तुनः नायकः साकेतविहारी 'श्रीरामः' अस्ति। यः लङ्काधिपतेः दशाननरावणस्य घोरैः अत्याचारैः अनाचारैः उत्पातैश्च सन्त्रस्तं पृथ्वीलोकं स्वर्गलोकञ्च उद्धर्तुं देवगणानां प्रार्थनया अयोध्यानरेशस्य महाराजदशरथस्य महाराज्ञ्याः कौसल्यायाः च पुत्ररूपेण अवतारं गृहीत्वा नरलीलां कुर्वन् दुर्दान्तस्य राक्षसस्य दशाननरावणस्य समूलं विनाशं कृतवान्, तथा च मनुष्यलोकस्य देवलोकस्य च सर्वान् प्राणिनः उद्धारितवान्। यदा साकेतविहारी श्रीरामः अवतारं धृतवान्, तदा साकेतस्य महाराज्ञी श्रीसीतादेव्यपि मिथिलाधिपतेः महाराजजनकस्य महाराज्ञ्याः सुनयनायाश्च पुत्रिरूपेण अवतीर्य श्रीरामचन्द्रस्य धर्मपत्नी भूत्वा जगदुद्धारकार्ये सदैव श्रीरामस्य सहचरी बभूव। महाकवि-श्रीरामभद्राचार्याः कथावस्तुनि एतदपि वर्णितवन्तः यत् वैकुण्ठाधिपतिः श्रीविष्णुः भरतरूपेण, क्षीरसागरशायी श्रीविष्णुः लक्ष्मणरूपेण तथा च श्वेतद्वीपाधिपतिः श्रीविष्णुः शत्रुघ्नरूपेण अवतीर्य भगवतः श्रीरामस्य आदर्शभ्रातृरूपेण तेषां सेवायां सन्निहिताः अभवन्।[१३]

भगवतः श्रीरामस्य जन्म, बाललीला, संस्काराः, शिक्षा-दीक्षा, धनुर्भङ्गः, चतुर्णामपि भ्रातॄणां विवाहः, श्रीरामस्य वनगमनं, महाराजदशरथस्य पुत्रवियोगे प्राणत्यागः, भरतस्यागमनम्, पितृशोकेन भ्रातृवियोगेन च दुःखितस्य भरतस्य करुणदशा, चित्रकूटस्थश्रीरामचन्द्रेण प्रजाजनस्य कल्याणम्, वने राक्षसानां खरदूषणादीनां वधः, रावणेन सीतादेव्याः अपहरणं, तदनन्तरं श्रीरामस्य कारुणिकी स्थितिः, सीतान्वेषणं, लङ्कादहनं, श्रीरामरावणयुद्धम्, श्रीरामस्य राज्याभिषेकः, तेषां शासनव्यवस्था इत्यादीनि वर्ण्यविषयानि स्वकीयया मौलिकया प्रतिभया अद्भुतया च कल्पनाशक्त्या सङ्गीतात्मकशैल्यां विरच्य स्वामीश्रीराम-भद्राचार्यमहाराजाः स्वकीयम् महाकाव्यमिदम् अखिलसंस्कृतवाङ्मये गीतशैल्यां विरचितस्य प्रथमसंस्कृतमहाकाव्यस्य गौरवं प्रापितवन्तः।

सन्दर्भग्रन्थाः

१. 'गीतरामायणम्' (गीतसीताभिरामम्), बालकाण्ड, मङ्गलाचरण, श्लोक संख्या-1, रचनाकार - जगद्गुरु स्वामी श्रीरामभद्राचार्यजी महाराज, प्रकाशक – जगद्गुरुरामानन्दाचार्यविकलाङ्ग-विश्वविद्यालय, चित्रकूट, उ.प्र.- 210204, प्रकाशन वर्ष - विक्रमाब्द 2067, पृष्ठ संख्या1

२. तत्रैव, पृष्ठ संख्या 2

३. तत्रैव, पृष्ठ संख्या 2

४. श्रीमद्गोस्वामी तुलसीदासजीविरचित 'श्रीरामचरितमानस', बालकाण्ड दोहा 33, प्रकाशक - गीताप्रेस गोरखपुर, प्रकाशन वर्ष सं. 2048, पृष्ठ संख्या 65 से 66

५. तत्रैव, बालकाण्ड दोहा 114, पृष्ठसंख्या 100

६. तत्रैव, उत्तरकाण्ड, दोहा 52, पृष्ठसंख्या 616

७. गीतरामायणम्, बालकाण्ड, द्वितीय सर्ग, गीतसंख्या-3 की भौमी व्याख्या, पृष्ठसंख्या-49

८. तत्रैव, बालकाण्ड, प्रथम सर्ग, गीतसंख्या-4, पृष्ठसंख्या 7-8

९. तत्रैव, मङ्गलाचरण, श्लोक संख्या-4, पृष्ठ संख्या-3

१०.तत्रैव, अयोध्याकाण्ड, द्वितीय-सर्ग, गीतसंख्या-2, पृष्ठसंख्या-47

११. तत्रैव, बालकाण्ड, द्वितीय-सर्ग, गीतसंख्या-3, पृष्ठसंख्या-48

१२.तत्रैव, सुन्दरकाण्ड, द्वितीय-सर्ग, गीतसंख्या-1, पृष्ठसंख्या-699

१३.तत्रैव, बालकाण्ड, द्वितीय-सर्ग, गीतसंख्या-3, पृष्ठसंख्या-49 (भौमी व्याख्या)